नलोपाख्यानम्

28

बृहदश्व उवाच।

स मासमुष्य कौन्तेय भीममामन्त्र्य नैषधः।

पुरादल्पपरीवारो जगाम निषधान्प्रति॥ ३-७७-१ ॥

रथेनैकेन शुभ्रेण दन्तिभिः परिषोडशैः।

पञ्चाशद्भिर्हयैश्चैव षड्भतैश्च पदातिभिः॥ ३-७७-२ ॥

स कम्पयन्निव महीं त्वरमाणो महीपतिः।

प्रविवेशातिसंरब्धस्तरसैव महामनाः॥ ३-७७-३ ॥

ततः पुष्करमासाद्य वीरसेनसुतो नलः।

उवाच दीव्याव पुनर्बहु वित्तं मयार्जितम्॥ ३-७७-४ ॥

दमयन्ती च यच्चान्यन्मया वसु समर्जितम्।

एष वै मम संन्यासस्तव राज्यं तु पुष्कर॥ ३-७७-५ ॥

पुनः प्रवर्ततां द्यूतमिति मे निश्चिता मतिः।

एकपणेन भद्रं ते प्राणयोश्च पणावहे॥ ३-७७-६ ॥

जित्वा परस्वमाहृत्य राज्यं वा यदि वा वसु।

प्रतिपाणः प्रदातव्यः परं हि धनमुच्यते॥ ३-७७-७ ॥

न चेद्वाञ्छसि तद्द्यूतं युद्धद्यूतं प्रवर्तताम्।

द्वैरथेनास्तु वै शान्तिस्तव वा मम वा नृप॥ ३-७७-८ ॥

वंशभोज्यमिदं राज्यं मार्गितव्यं यथा तथा।

येन तेनाप्युपायेन वृद्धानामिति शासनम्॥ ३-७७-९ ॥

द्वयोरेकतरे बुद्धिः क्रियतामद्य पुष्कर।

कैतवेनाक्षवत्यां वा युद्धे वा नम्यतां धनुः॥ ३-७७-१० ॥

नैषधेनैवमुक्तस्तु पुष्करः प्रहसन्निव।

ध्रुवमात्मजयं मत्वा प्रत्याह पृथिवीपतिम्॥ ३-७७-११ ॥

दिष्ट्या त्वयार्जितं वित्तं प्रतिपाणाय नैषध।

दिष्ट्या च दुष्कृतं कर्म दमयन्त्याः क्षयं गतम्।

दिष्ट्या च ध्रियसे राजन्सदारो ऽरिनिबर्हण॥ ३-७७-१२ ॥

धनेनानेन वैदर्भी जितेन समलंकृता।

मामुपस्थास्यति व्यक्तं दिवि शक्रमिवाप्सराः॥ ३-७७-१३ ॥

नित्यशो हि स्मरामि त्वां प्रतीक्षामि च नैषध।
देवने च मम प्रीतिर्न भवत्यसुहृद्गणैः॥ ३-७७-१४॥
जित्वा त्वद्य वरारोहां दमयन्तीमनिन्दिताम्।
कृतकृत्यो भविष्यामि सा हि मे नित्यशो हृदि॥ ३-७७-१५॥
श्रुत्वा तु तस्य ता वाचो बह्वबद्धप्रलापिनः।
इयेष स शिरश्छेत्तुं खड्गेन कुपितो नलः॥ ३-७७-१६॥
स्मयंस्तु रोषताम्राक्षस्तमुवाच ततो नृपः।
पणावः किं व्याहरसे जित्वा वै व्याहरिष्यसि॥ ३-७७-१७॥
ततः प्रावर्तत द्यूतं पुष्करस्य नलस्य च।
एकपाणोन भद्रं ते नलेन स पराजितः।
सरत्नकोशनिचयः प्राणेन पणितो ऽपि च॥ ३-७७-१८॥
जित्वा च पुष्करं राजा प्रहसन्निदमब्रवीत्।
मम सर्वमिदं राज्यमव्यग्रं हतकण्टकम्॥ ३-७७-१९॥
वैदर्भी न त्वया शक्या राजापसद वीक्षितुम्।
तस्यास्त्वं सपरीवारो मूढ दासत्वमागतः॥ ३-७७-२०॥
न तत्त्वया कृतं कर्म येनाहं निर्जितः पुरा।
कलिना तत्कृतं कर्म त्वं तु मूढ न बुध्यसे।
नाहं परकृतं दोषं त्वय्याधास्ये कथंचन॥ ३-७७-२१॥
यथासुखं त्वं जीवस्व प्राणानभ्युत्सृजामि ते।
तथैव च मम प्रीतिस्त्वयि वीर न संशयः॥ ३-७७-२२॥
सौभ्रात्रं चैव मे त्वत्तो न कदाचित्प्रहास्यति।
पुष्कर त्वं हि मे भ्राता संजीवस्व शतं समाः॥ ३-७७-२३॥
एवं नलः सान्त्वयित्वा भ्रातरं सत्यविक्रमः।
स्वपुरं प्रेषयामास परिष्वज्य पुनः पुनः॥ ३-७७-२४॥
सान्त्वितो नैषधेनैवं पुष्करः प्रत्युवाच तम्।
पुण्यश्लोकं तदा राजन्नभिवाद्य कृताञ्जलिः॥ ३-७७-२५॥
कीर्तिरस्तु तवाक्षय्या जीव वर्षायुतं सुखी।
यो मे वितरसि प्राणानधिष्ठानं च पार्थिव॥ ३-७७-२६॥
स तथा सत्कृतो राज्ञा मासमुष्य तदा नृपः।
प्रययौ स्वपुरं हृष्टः पुष्करः स्वजनावृतः॥ ३-७७-२७॥

महत्या सेनया राजन्विनीतैः परिचारकैः।

भ्राजमान इवादित्यो वपुषा पुरुषर्षभ॥ ३-७७-२८॥

प्रस्थाप्य पुष्करं राजा वित्तवन्तमनामयम्।

प्रविवेश पुरं श्रीमानत्यर्थमुपशोभितम्।

प्रविश्य सान्त्वयामास पौरांश्च निषधाधिपः॥ ३-७७-२९॥

29

बृहदश्व उवाच।

प्रशान्ते तु पुरे हृष्टे संप्रवृत्ते महोत्सवे।

महत्या सेनया राजा दमयन्तीमुपानयत्॥ ३-७८-१॥

दमयन्तीमपि पिता सत्कृत्य परवीरहा।

प्रस्थापयदमेयात्मा भीमो भीमपराक्रमः॥ ३-७८-२॥

आगतायां तु वैदर्भ्यां सपुत्रायां नलो नृपः।

वर्तयामास मुदितो देवराडिव नन्दने॥ ३-७८-३॥

तथा प्रकाशतां यातो जम्बूद्वीपे ऽथ राजसु।

पुनः स्वे चावसद्राज्ये प्रत्याहृत्य महायशाः॥ ३-७८-४॥

ईजे च विविधैर्यज्ञैर्विधिवत्स्वाप्तदक्षिणैः।

तथा त्वमपि राजेन्द्र ससुहृद्वक्ष्यसे ऽचिरात्॥ ३-७८-५॥